# Chapter 1: The Marriage of Śikhidhvaja

वसिष्ठ उवाच

एतामवष्टभ्यौ दृशं भगीरथधिया धृताम्
समः स्वस्थो यथाप्राप्तं कार्यमाहर शान्तधीः १
इदं पूर्वं परित्यज्य क्रोडीकृत्य मनःखगम्
शान्तमात्मनि तिष्ठ त्वं शिखिध्वज इवाचलः २

श्रीराम उवाच

कोऽसौ शिखिध्वजो नाम कथं वा लब्धवान्पदम्
एतन्मे कथय ब्रह्मन्भूयो बोधविवृद्धये ३

वसिष्ठ उवाच

द्वापारे भवतां पूर्वमिदानीं च भविष्यतः
तेनैव संनिवेशेन दंपती स्निग्धतां गतौ ४

श्रीराम उवाच

यत्पूर्वमासीद्भगवंस्तदिदानीं तथैव हि
भविष्यति किमर्थं वै वद मे वदतां वर ५

वसिष्ठ उवाच

जगन्निर्माणनियतेरस्या ब्रह्मादिसंविदः
ईदृश्यवस्थितिर्नित्यमनिवार्यस्वभावजा ६
यदन्यद्बहुशो भूत्वा पुनर्भवति भूरिशः

अभूत्वैव भवत्यन्यः पुनश्च न भवत्यलम् ७
अन्यत्प्राक्संनिवेशाढ्यं सादृश्येन विवल्गति
सदृशा विषमाश्चैव यथा सरसि वीचयः ८
ता एवान्याश्च दृश्यन्ते व्यवस्थाः संसृतौ तथा
तस्माद्राजेव भूयोऽपि वक्ष्यमाणकथेश्वरः ९
भविष्यति महातेजास्तद्वृत्तान्तमिमं शृणु
द्वापरे पूर्वमभवदतीते सप्तमे मनौ १०
चतुर्युगे चतुर्थे तु सर्गेऽस्मिन्कुरुणां कुले
जम्बुद्वीपे प्रसिद्धस्य विन्ध्यस्यादूरसंस्थिते ११
मालवानां पुरे श्रीमाञ्छिखिध्वज इतीश्वरः
धैर्यौदार्यदशायुक्तः क्षमाशमदमान्वितः १२
शूरः शुभसमाचारो मौनी गुणगणाकरः
आहर्ता सर्वयज्ञानां जेता सर्वधनुष्मताम् १३
कर्ता सकलकार्याणां भर्ता पूर्ववपुर्भुवः
पेशलस्निग्धमधुरो विदग्धः प्रीतिसागरः १४
सुन्दरः शान्तसुभगः प्रतापी धर्मवत्सलः
वदिता विनयार्थानां दाता सकलसंपदाम् १५
भोक्ता सत्सङ्गसहितः सुश्रोता सकलश्रुतेः
वेदासौ माननाशून्यः स्त्रैणं तृणवदस्पृशन् १६

पितरि स्वर्गमापन्ने बाल एवोत्तमौजसा
कृत्वा षोडशवर्षाणि स्वयं दिग्विजयं वशी १७
नूनं साम्राज्यसंपत्त्या भूमण्डलमयोजयत्
अतिष्ठद्विगताशङ्कं पालयन्धर्मतः प्रजाः १८
स धीमान्मन्त्रिभिः सार्धं यशसा शुक्लयन्दिशः
अथ गच्छत्सु वर्षेषु वसन्ते प्रोल्लसत्यलम् १९
पुष्पेषु जृम्भमाणेषु स्फुरत्सु शशिरश्मिषु
मञ्जरीजालदोलासु विटपान्तःपुरान्तरे २०
रजःकर्पूरधवले वलद्दलकपाटके
आमोदविलसत्पुष्पगुलुच्छकवितानके २१
गायत्सु गहनेषूच्चैर्मिथुनेष्वलिनां मिथः
आवाति मधुरे वायौ शशिशीकरशीतले २२
कदलीकन्दलीकच्छतलपल्लवलासिनि
कान्तां प्रति बभूवास्य वसच्चेतः समुत्सुकम् २३
क्षीबं कुसुमसंभारसौगन्ध्यमधुरासवैः
मनो नान्यास्पदं चक्रे स वसन्तमिवोदितम् २४
उद्यानवनदोलासु लीलाकमलिनीषु च
कदा प्रणयिनीं मुग्धां हेमाब्जमुकुलस्तनीम् २५
करिष्ये कामिनीमङ्के पर्यङ्के कुङ्कुमाङ्किताम्

कदा कमलवल्लीनां दोलास्वलिरिवालिनीम् २६
आलोलां तां निवेक्ष्यामि बालां भुजलतानुगाम्
मृणालहारकुन्देन्दुवृन्दवल्यमिलाषिणी २७
मत्कृते मदनातप्ता कदा स्यादिन्दुसुन्दरी
इति चिन्तापरो भूत्वा कुसुमावचयोन्मुखः २८
विजहार वनान्तेषु कुसुमोपवनेषु च
वनोपवनलेखासु लीलाकमलिनीषु च २९
वल्लीवलयगेहेषु विविधोद्यानभूमिषु
वनोपवनविन्यासवर्णनावलितासु च ३०
शृङ्गाररसगर्भासु कथास्वरमतोन्मनाः
हृदि हारलसत्कायविलोलालकवल्लरीः ३१
कुमारीः पूजयामास सुवर्णकलशस्तनीः
एतन्मन्ये विदुर्भव्या मन्त्रिणो नृपनिश्चयम् ३२
इङ्गिताकारवेदित्वमेव मन्त्रिपदं परम्
अथ तस्य विवाहाय मन्त्रिवर्गो विचारयन् ३३
सुराष्ट्राधिपतेः कन्यां ययाचे यौवतान्विताम्
नवयौवनसंपन्नां भार्यात्वे विधिनोत्तमाम् ३४
उपयेभे स तामात्मसदृशीं प्रतिमामिव

चूडालेति भुवि ख्याता नाम्ना नृपतिसुन्दरी ३५
सा तं भर्तारमासाद्य रेजे फुल्लेव पद्मिनी
नीलनीरजनेत्रां तां चूडालां स शिखिध्वजः ३६
स्नेहाद्विकासयामास सूर्यो देवो यथाब्जिनीम्
अवर्धत तयोः प्रीतिरन्योन्यार्पितचेतसोः ३७
हावभावविलासाढ्यैरङ्गैर्नवलतेव सा
सुमन्त्र्यर्पितसर्वार्थः स सुखी सुस्थितप्रजाः ३८
राजहंस इवाब्जिन्या रेमे दयितया तया
अन्तःपुरेषु दोलासु लीलाकमलिनीषु च ३९
उद्यानेषु विहारेषु लतापुष्पगृहेषु च
कदम्बवनलेखासु चन्दनागुरुवीथिषु ४०
मन्दारदामलोलासु कदलीकन्दलीषु च
पुरान्तेषु वनान्तेषु दिगन्तेषु सरस्सु च ४१
जंगलेषु जनान्तेषु जम्बूजम्बीरजातिषु
बभूवाह्लादकं सर्वं तयोरन्योन्यचेष्टितम् ४२
सद्वर्षयोर्धुरवैर्द्युभूम्योरिव कान्तयोः
नित्यमेव वियुक्तत्वात्प्रियत्वाच्चेष्टितस्य च ४३
मिथः कलाकलापस्य कोविदौ तौ बभूवतुः
स्वरूपमेकमेवैतौ दधतुर्मित्रतां गतौ ४४

अन्योन्यहृदयस्थत्वादिव संक्रान्तमक्षतम्
सर्वशास्त्रार्थवैदग्ध्यं चित्राद्यपि मुखात्प्रभोः ४५
बालः कालाद्रिवागृह्य साऽसीत्सर्वार्थपण्डिता
नृत्यवाद्यादि यावच्च चूडालावदनादसौ ४६
अशिक्षत बभूवाथ कलानामतिकोविदः
अमावास्यामिवेन्द्वर्कावन्योन्यविलसत्कलौ ४७
मिथो हृदयसंस्थौ तौ द्वावप्यैक्यमुपागतौ
तौ संस्थितावेकरसावन्योन्यं दयितावुभौ ४८
पुष्पामोदाविवाभिन्नौ भूतलस्थौ शिवाविव
वैदग्ध्यसुन्दरमती सर्वशास्त्रार्थपण्डितौ ४९
कार्यार्थं च भुवं प्राप्तौ कमलाकमलाधवौ
स्नेहात्प्रसन्नमधुरौ समविज्ञातवादिनौ ५०
अनुवृत्तिपरावास्तां लोकवृत्तान्ततद्विदौ
कलाकलापसंपन्नौ लसद्रसरसायनौ
शीतलस्निग्धमुग्धाङ्गौ शशाङ्कौ द्वाविवोदितौ
५१
रेजे लसच्च रतिभोगविलासकान्तम्
अन्तःपुरेषु मिथुनं तदनुत्तमश्रि ।
ब्रह्माण्डखण्डकुहरेष्विव राजहंस-

युग्मं विकासिमदमन्मथमन्दचारि ५२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु निर्वाणप्रकरणे चूडालोपाख्याने शिखिध्वजविलासकथनं नाम सप्तसप्ततितमः सर्गः ७७